# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2018 - ’19

**Class : VIII** | **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्ड: क - अपठित अवबोधनम् - 5
खण्ड: ख - रचनात्मक कार्यम् - 15
खण्ड: ग - अनुप्रयुक्त व्याकरणम् - 25
खण्ड: घ - पठित अवबोधनम् - 35

## खण्ड: क (अपठित अवबोधनम्)

1. **अधोलिखित अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तरत।**

एकस्मिन् नगरे द्वे मित्रे वसत: स्म। एकस्य नाम सोमेश: आसीत् अन्यस्य नाम धनेश: आसीत्। सोमेश: विद्यां इच्छति स्म धनेश: च प्रभूतं धनम्। एकदा मित्रद्वयं विदेशम् अगच्छत्। तत्र सोमेश: परिश्रमेण अध्ययनं ज्ञात्वा विद्यां प्राप्तवान्। धनेश: बहु धनसंग्रहणं कृतवान्। एवं अनेकानि वर्षाणि व्यतीतानि। तौ अचिन्तयताम् - ‘अधुना आवां गृहं गच्छाव:’। गृहं प्रति आगमनसमये मार्गे चौरा: आगच्छन्। ते धनेशस्य सर्वं धनं अहरन्। धनेश: दु:खी अभवत्। स: रिक्तहस्त: गृहं आगच्छत्। परन्तु सोमेश: विद्याधनयुक्त: आसीत्। विद्याधनेन युक्त: स: शीघ्रं एव अतीव प्रसिद्ध: अभवत्। तस्य प्रसिद्धि कृत्वा राजा विद्यावन्तम् सोमेशं आहूय तस्य सम्मानम् अकरोत्। स: तस्मै मन्त्रिपदमपि अयच्छत्। सत्यं एव कथ्यते - ‘विद्या एव सर्वत्र पूज्यते’।

**I. एक पदेन उत्तरत।** **1**

क. द्वे मित्रे कुत्र वसत: स्म?

ख. मार्गे के आगच्छन्?

**II. पूर्णवाक्येन उत्तरत।** **2**

क. क: विद्याधनं प्राप्तवान्?

ख. राजा सोमेशाय किम् अयच्छत्?

**III. भाषिककार्यम्।** **2**

क. 'अचिन्तयतां' इति क्रियापदस्य कर्तृपदं किम्?
(राजा, सोमेशः, तौ, धनेशः)

ख. 'प्रभूतं' इति पदं कस्य विशेषणपदं अस्ति?
(विशेदस्य, विद्यायाः, परिश्रमस्य, धनस्य)

ग. 'शनैः' इति पदस्य किं विपरीतपदं अत्र प्रयुक्तम्।
(शीघ्रं, वर्षाणि, व्यतीतानि, एकदा)

घ. 'सः तस्मै मन्त्रिपदमपि अयच्छत्' इति वाक्ये 'सः' सर्वनामपदं 'कस्मै' प्रयुक्तम्?
(सोमेशाय, धनेशाय, राज्ञे, चौराय)

## खण्डः ख (रचनात्मकं कार्यम्)

**2. पितरं प्रति रूप्यकयाचनार्थं पत्रं मञ्जूषायाः सहायतया पूरयत।** **5**

मञ्जूषाः
(कृपया, शोभनानि, सकुशलः, प्रणामाः, प्रियपुत्रः, आदरणीयाः, शैक्षिककयात्रायाः, अध्यापकाः, परीक्षा, स्वर्ण मन्दिरं)

पूर्णप्रज्ञा छात्रावासः।
कुरुक्षेत्रम्।

क. -------- पितृमहाभागाः
सादरं प्रणामाः।
अहं अत्र ख. ---------- अस्मि। आशा अस्ति तत्रापि कुशलं भवेत्। मम प्रथमसत्रीया ग. ---------- अद्यैव समाप्ता। मम उत्तर पत्राणि घ. --------- अभवन्। परीक्षाफलं सप्ताहानन्तरं आगमिष्यति। विद्यालयेन एकस्याः ङ. -------- आयोजनं कृतम्। वयं च. ---------- द्रष्टुं अमृतसरनगरं गमिष्यामः। चत्वारः छ. ----------- चापि अस्माभिः सह गमिष्यन्ति।
एतदर्थं ज. ----------- रूप्यकाणां पञ्चशतं प्रेषयतु भवान्। मातृ चरणयोः मम झ. ----------- कथनीयाः। अनुजाय स्नेहराशिः।

भवदीयः ञ. ---------
सौरभः।

**3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** **5**

मञ्जूषा
(ग्रीष्मकाले, जलक्रीडाम्, स्यूतौ, सन्ति, तरणताले, तिष्ठन्ति, जलम्, स्वच्छम्, जनः, अस्ति, बालाः, कुर्वन्त, प्रसन्नाः, तीरे, कन्दुकम्, तरन्ति)



**4. आंगलभाषया लिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत।** **5**

क. A lion lived in a cave.

ख. Bees are making honey.

ग. Where is Ramalika?

घ. We are going to school.

ङ. There are three flowers.

## खण्ड: ग (अनुप्रयुक्तव्याकरणं)

**5. रेखाङ्किकतपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** **4**

क. अथ <u>एतच्छ्रुत्वा</u> सिंह: अचिन्तयत्।

ख. समुद्रमासाद्य <u>भवन्ति + अपेया:</u>।

ग. <u>विनैव</u> यानं नगारोहणम्।

घ. त्रीणि सर्पा: भवन्त्येते चतुर्थी <u>न + अधिगम्यते</u>।

**6. उचित संख्यापदेन रिक्तस्थानानि पूरयत।** **4**

क. वाटिकायां <u>72</u> गन्धकुसुमानि सन्ति।

ख. वृक्षे <u>58</u> खगा: उपविशन्ति।

ग. कक्षायां <u>45</u> छात्रा: पठन्ति।

घ. मम पिता <u>60</u> रुप्यकाणि दत्तवान्।

**7. मञ्जूषाया: उचितम् अव्यय पदं चित्वा लिखत।** **5**

(मा, ह्य:, सदा, सहसा, तथा)

क. -------- भगवन्तं भज।

ख. -------- बालिका तत्र अक्रन्दत्।

ग. अहं --------- मन्दिरम् अगच्छम्।

घ. स: यथा चिन्तयति ---------- आचरति।

ङ. पुष्पाणि ---------- त्रोटय।

**8. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य-विभज्य वा लिखत।** 4

क. व्याघ्रः तद् वृत्तान्तं प्रदर्शय् + तुमुन् तस्मिन् जाले प्राविशत्।

ख. त्रयः सर्पाः इति वक्तव्यम्।

ग. सः गुहायां प्र + विश् + क्त दृश्यते।

घ. सिंहः गुहाम् दृष्ट्वा अचिन्तयत्।

**9. उचित विभक्तिं उपयुज्य वाक्यं पूरयत।** 4

क. मूर्ख वैद्य! अलं ---------- (परिश्रम)

ख. ---------- नमः। (भगवती)

ग. सः ---------- प्रविश्य मे भोज्यं भविष्यति। (बिल)

घ. वैद्यः ----------- सह आगच्छति। (चेटी)

**10. कोष्ठके प्रदत्त धातूनां क्रियापदानां समुचितपदं पूरयत।** 4

क. अहं श्वः चेन्नई-नगरं ---------। (गम् + लृट्)

ख. गुरुः शिष्यम् प्रश्नं ------------। (पृच्छ् + लट्)

ग. वृक्षस्य अधः वृद्धाः ----------। (उप + विश् + लङ्)

घ. वयं गृहं ----------। (गम् + लोट्)

## खण्डः घ (पठित अवबोधनम्)

**11. अधोलिखित गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृतेन लिखत।**

एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम श्रृगालः समागच्छत्। स च यावत् पश्यति, तावत् सिंह पदपद्धतिः गुहायां प्रविष्टा दृश्यतेऽन च बहिरागता। श्रृगालः अचिन्तयत् - 'अहो विनष्टोऽस्मि नूनं अस्मिन् बिले सिंहः अस्तीति तर्कयामि। तत् किं करवाणि'? एवं विचिन्त्य दूरस्थः रवं कर्तुं आरब्धः - 'भो बिल' भो बिल! किं न स्मरसि, यन्मया त्वया सह समयः कृतोऽस्ति यन् यदाहं बाह्यतः प्रत्यागमिष्यामि तदा त्वं मां आकारयिष्यसि? यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि इति'।

**I. एकपदेन उत्तरत।** 2

क. गुहायाः स्वामी कः आसीत्?

ख. कस्य पदपद्धतिः गुहायां प्रविष्टा दृश्यते?

**II. पूर्णवाक्येन उत्तरत।** 2

श्रृगालः किं अचिन्तयत्?

**III. भाषिककार्यम्।** 2

क. 'चिन्तयित्वा' इति पदस्य समानपदं किम्?
(प्रविष्टा, अचिन्तयत्, यास्यामि, विचिन्त्य)

ख. 'सह' इति शब्दस्य योगे का विभक्ति?
(द्वितीया, तृतीया, चतुर्थी, प्रथमा)

ग. अहं द्वितीयं बिलं यास्यामि इति। अत्र 'यास्यामि' इति क्रियापदस्य कर्तृपदं किम्?
(वयं, बिलं, अहं, द्वितीयं)

घ. 'अस्मिन् बिले' इति पदस्य विशेषण पदं किम्?
(बिले, अस्मिन्, सिंहः, नूनं)

**12. अधोलिखित पद्यांशं पठित्वा प्रश्नानां उत्तरं लिखत।**

पीत्वा रसं तु कटुकं मधुरं समानं
माधुर्यमेव जनयेन्मधुमक्षिकासौ।
सन्तस्तथैव समसज्जनदुर्जनानां
श्रुत्वा वचः मधुरसूक्तरसं सृजन्ति ॥

**I. एकपदेन उत्तरं लिखत।** **2**

क. मधुमक्षिका किं जनयेत्?

ख. सन्तः किं सृजन्ति?

**II. पूर्णवाक्येन उत्तरं लिखत।** **2**

सन्तः केषां वचः श्रुत्वा मधुरसूक्तरसं सृजन्ति?

**III. भाषिककार्यम्।** **2**

क. 'आकर्ण्य' इति पदस्य समानपदं किम्?
(पीत्वा, समानं, सृजन्ति, श्रुत्वा)

ख. 'सज्जनः' इति पदस्य विपरीतपदं किम्?
(सन्तः, दुर्जनः, सम, समानं)

ग. 'तथैव' इति पदस्य सन्धिच्छेदं कुरुत।
(तथ + एव, तथा + ऐव, तथा + एव, तथा + इव)

घ. 'पीत्वा' इति पदस्य धातु-प्रत्ययं लिखत।
(पी + क्त्वा, पा + क्त्वा, पी + त्वा, पा + त्वा)

**13. अधोलिखित नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत।**

(ततः प्रविशति वैद्यः)
वैद्यः - गुलिकाः मया आनीताः। उदकं, उदकं।
चेटीः - इदं उदकम्।
वैद्यः - गुलिकाः अवघट्टयामि।
गणिका - (सन्यासिनः स्वरेण) मूर्ख वैद्य। जानासि कतमेन सर्पेण इयं स्त्री दष्टा?
वैद्यः - अरे इयं प्रेतेन आविष्टा।
गणिका - शास्त्रं जानासि?
वैद्यः - अथ किम्?
गणिका - ब्रूहि वैद्य शास्त्रं।
वैद्यः - श्रृणोतु भवती।

**I. एकपदेन उत्तरत। 2**

क. 'इयं प्रेतेन आविष्टा' इति वाक्यं कः अवदत्?

ख. चेटी किं ददाति?

**II. पूर्णवाक्येन उत्तरत। 2**

गणिका सन्यासिनः स्वरेण किं उक्तवती?

**III. भाषिककार्यम्। 2**

क. 'इयं स्त्री सर्पेण दष्टा' इति वाक्ये विशेष्यपदं किम्?
(सर्पेण, दष्टा, स्त्री, इयं)

ख. 'नीरं' इत्यस्य समानपदं अनुच्छेदात् लिखत?
(इयं, इदं, उदकं, गुलिकाः)

ग. 'श्रुणोतु' इति क्रियापदस्य लकारं किम्?
(लट्, लोट्, लङ्, विधिलिङ्ग)

घ. 'चतुरः' इति पदस्य विपरीतपदं किम्?
(मूर्खः, इयं, उदकं, वैद्यः)

**14. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 5**

क. <u>नद्यः</u> सुस्वादुतोयाः प्रभवन्ति।

ख. सत्यं <u>त्वया</u> भणितम्।

ग. <u>महतीं</u> गुहां दृष्ट्वा सिंहः अचिन्तयत्।

घ. व्याघ्रः <u>जाले</u> प्राविशत्।

ङ. <u>बिलस्य</u> वाणी न कदापि मे श्रुत।

**15. निम्नलिखित श्लोकस्य अन्वयं पूरयत। 4**

गिरिशिखरे ननु निजनिकेतनम्।
विनैव यानं नगारोहणम् ॥
बलं स्वकीयं भवति साधनम्।
सदैव पुरतो निधेहि चरणम् ॥

मञ्जूषा
(बलं, गिरिशिखरे, चरणं, यानं)

अन्वयं
ननु क. ----------- निजनिकेतनं ख. ---------- विना एव नगारोहणम्।
स्वकीयं ग. -------- साधनं भवति सदैव पुरतः घ. ---------- निधेहि।

**16. घटनक्रमानुसारं वाक्यानि लिखत। 4**

क. सः गुहायां निगूढो भूत्वा अतिष्ठत्।

ख. सः उच्चैः वदति - 'हे बिल! यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि'।

ग. सिंहस्य उच्चगर्जन - प्रतिध्वनिना सर्वे पशवः भयभीताः अभवन्।

घ. स: चिन्तयति - नूनं सिंह: बिलस्य अन्त: स्थित:। किं करवाणि?

ङ. श्रृगाल: आगत्य पश्यति सिंह पदपद्धति: गुहायां प्रविष्टा।

च. क्षुधार्त: स: इत: तत: भ्रमति सूर्यास्तसमये च एकां गुहां पश्यति।

छ. कस्मिंश्चित् वने एक: सिंह: वसति स्म।

ज. कदाचित् भयात् बिलं न वदति इति विचार्य सिंह: श्रृगालस्य आह्वानम् अकरोत्।

**17. शुद्धम् पर्यायपदं चिनुत।** **4**

क. बिलस्य वाणी न कदापि मे श्रुता।
(वाक्, शब्दं, स्वामी, नाम)

ख. सा क्षिप्रं तत्रैव नीयतां।
(शनै:, कदापि, चरणं, शीघ्रम्)

ग. भगवन्मुच्यतां गणिकाया: शरीरम्।
(चक्षु:, तनु:, स्वर:, जीवनं)

घ. राज्यं प्रमत्तसचिवस्य नराधिपस्य।
(नरस्य, सज्जनस्य, राज्ञ:, राज्यस्य)